# Vedavyasaproktam Ganapati Stotram

# वेदव्यासप्रोक्तं गणपतिस्तोत्रम्

## Document Information

Text title : Vedavyasaproktam Ganapati Stotram

File name : vedavyAsaproktaMgaNapatistotram.itx

Category : ganesha, padmapurANa, stotra, aShTaka

Location : doc_ganesha

Proofread by : PSA Easwaran

Description/comments : padmapurANa | sRRiShTikhaNDa | adhyAya 64/1-11||

Latest update : April 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 5, 2025

*sanskritdocuments.org*

# वेदव्यासप्रोक्तं गणपतिस्तोत्रम्

व्यास उवाच ।
पुनरन्यत्प्रवक्ष्यामि स्तोत्रं गणाधिपस्य च ।
सर्वसिद्धिकरं पूतं सर्वाभीष्टफलप्रदम् ॥ १॥

एकदन्तं महाकायं तप्तकाञ्चनसन्निभम् ।
लम्बोदरं विशालाक्षं वन्देऽहं गणनायकम् ॥ २॥

मुञ्जकृष्णाजिनधरं नागयज्ञोपवीतकम् ।
बालेन्दुकलिकामौलिं वन्देऽहं गणनायकम् ॥ ३॥

सर्वविघ्नहरं देवं सर्वविघ्नविवर्जितं
मूषकोत्तममारुह्य देवासुरमहाहवे ।
योद्धुकामं महाबाहुं वन्देऽहं गणनायकम् ॥ ४॥

अम्बिकाहृदयानन्दं मातृकापरिवेष्टितम् ।
भक्तप्रियं मदोन्मत्तं वन्देऽहं गणनायकम् ॥ ५॥

चित्ररत्नविचित्राङ्गं चित्रमालाविभूषणम् ।
कामरूपधरं देवं वन्देऽहं गणनायकम् ॥ ६॥

गजवक्त्रं सुरश्रेष्ठं चारुकर्णविभूषितम् ।
पाशाङ्कुशधरं देवं वन्देऽहं गणनायकम् ॥ ७॥

यक्षकिन्नरगन्धर्वैः सिद्धविद्याधरैस्सदा ।
स्तूयमानं महादेहं वन्देऽहं गणनायकम् ॥ ८॥

गणाष्टकमिदं पुण्यं भक्तितो यः पठेन्नरः ।
सर्वसिद्धिमवाप्नोति रुद्रलोके महीयते ॥ ९॥

न निःस्वतां तथाभ्येति सप्तजन्मसु मानवः ।
य इदं पठते नित्यं महाराजो भवेन्नरः ॥ १०॥

वश्यं करोति त्रैलोक्यं पठनाच्छ्रवणादपि ।
स्तोत्रं परं महापुण्यं गणपस्य महात्मनः ॥ ११॥

इति श्रीपाद्मपुराणे सृष्टिखण्डे चतुष्षष्टितमाध्यायान्तर्गतं
वेदव्यासकृतं गणपतिस्तोत्रं समाप्तम् ।

पद्मपुराण । सृष्टिखण्ड । अध्याय ६४/१-११॥

padmapurANa . sRRiShTikhaNDa . adhyAya 64/1-11..

Proofread by PSA Easwaran

*Vedavyasaproktam Ganapati Stotram*
pdf was typeset on April 5, 2025

Please send corrections to *sanskrit@cheerful.com*